अष्टमः पाठः

8

Lesson – 8

# हिमालयवर्णनम्

हिमालयः अस्माकं भारतस्य मकुटः भवति । अयं पर्वतः कृतयुगादारभ्य कलियुगपर्यन्तं स्थित्वा भारतस्य कीर्तिम् उत्पादयति। पुराणेष्वपि अस्य पर्वतस्य महिमा बहुधा वर्णितम् अस्ति। अस्मिन् पाठे अपि हिमालयस्य महिमाम् अधिकृत्य उक्तं भवति । अयं पाठ्यभागः महाकविकालिदासेन विरचितात् कुमारसंभवात् उद्घृत्य गद्यमयीकृतः । अस्मिन् पाठ्यभागे हिमालयस्य देवतात्वं, उत्कृष्टत्वं, औन्नत्यम् इत्यादयः विषयाः वर्णिताः सन्ति।



हिमालयः लोके सर्वोच्चः पर्वतः अस्ति । अयमेव विषयः महाकविकालिदासेन विरचिते कुमारसंभवे वर्णितं भवति ।



"अस्त्युत्तरस्यां दिशि देवतात्मा

हिमालयो नाम नगाधिराजः।

पूर्वापरौ वारिनिधीवगाह्य

स्थितः पृथिव्या इव मानदण्डः ।।

भारतस्य उत्तरस्यां दिशि हिमालयो नाम पर्वतः (नगः) वर्तते । सः पूर्वापरौ तोयनिधीवगाह्य स्थितः भारतस्य सीमां आपादयति। दैर्घ्येन, वैशाल्येन, औन्नत्येन च हिमालयः सर्वान् पर्वतान् अतिशेते। अतः अयं नगाधिराजः इति व्यपदिश्यते।

पुरा सर्वे शैलाः पृथुमहाराजेन उपदिष्टप्रकारेण हिमालयं वत्सं परिकल्प्य गोरूपभूमेः नानाविधरत्नानि महौषधयश्च दुहन्ति स्म । एतस्मात् कारणात् सर्वश्रेष्ठतमः शैलः हिमालयः इति प्रथा वर्तते । अयं शैलः सर्वदा हिमेन आवृतं भवति। यद्यपि हिमेन परिवृतस्यापि तस्य सौन्दर्यस्य न्यूनं न भवति । यथा चन्द्रस्य कलङ्कः दोषः न भवति, तथैव हिमालयस्यापि । उक्तं च महाकविकालिदासेन-

एको हि दोषो गुणसन्निपाते

निमज्जतीन्दोः किरणेष्विवाङ्कः ।।

अयं पर्वतः मेघात् अपि अत्युन्नतः वर्तते । हिमालस्य उन्नतशिखराणि एव सप्तर्षीणां वासस्थलानि इति कवयः वर्णयन्ति । निदाघकाले अत्र स्थिताः हिमाः विलीयमानाः वृष्टिरभावेऽपि गङ्गादि-नदीषु सर्वदा जलम् आपूरयन्ति। अतः हिमालयात् प्रवहन्त्यः नद्यः जीवनद्यः इति व्यवह्रियन्ते। हिमालयस्थाः तरवः लताश्च विविधान् औषधिपदार्थान् यच्छन्ति । हिमालयस्य गुहाः एव वनेचरणां गृहाणि भवन्ति। तेषु गृहेषु रात्रौ दीपाः न आवश्यकाः, यतः हिमालयस्य औषधीनां प्रभैव दीपरूपेण भवन्ति।

अपि च यागोपयोगीनि बहूनि वस्तूनि हिमालयात् एव प्राप्नुमः । अपि च अयं पर्वतः भूभारं वोढुं समर्थः भवति। भारतवर्षस्य सम्पत्समृद्धौ हिमालयः एव मुख्यः हेतुः ।

अत एव एनं देवतात्मा इति आकलयन्ति भारतीयाः। अपि च उक्तं महाकविकालिदासेन -

यावन्त्येतानि भूतानि स्थावराणि चराणि च।

मातरं कल्पयन्त्येनां ईशो हि जगतः पिता ।।



Unit 8.indd 53 06-06-2018 12:42:28

इति अनेन श्लोकेन शिवस्य विश्वगुरुत्वं सिद्ध्यति। तथा च -

अस्तोतुः स्तूयमानस्य वन्द्यस्यानन्यवन्दिनः ।

सुता संबन्धविधिना भव विश्वगुरोर्गुरुः ।।

विश्वगुरोः परमेश्वरस्य गुरुत्वात् अस्य पर्वतस्य देवतात्वं सिद्ध्यति ।।

## कविपरिचयः-

अस्य पाठस्य कर्ता महाकविः कालिदासः । सः भोजराजस्य आस्थाने आसीत् ।

“पुरा कवीनां गणनाप्रसङ्गे

कनिष्ठिकाधिष्ठितकालिदासा ।

अद्यापि तत्तुल्यकवेरभावात्

अनामिका सार्थवती बभूव ।।



अनेन श्लोकेन अयं श्रेष्ठतमः कविः इति ज्ञायते । सः बहूनि काव्यानि अरचयत् । “उपमा कालिदासस्य” इति वाक्येन अयम् उपमालङ्कारवर्णने समर्थः इति ज्ञायते।।

## अभ्यासः

### I. कठिनशब्दार्थः-

| | |
|---|---|
| 1. पर्वतः – mountain | 2.उत्तरस्यां दिशि – in the northern direction |
| 3. नगाधिराजः – king of mountain | 4. मानदण्डः – measuring scale |
| 5. तोयनिधिः – ocean | 6. सीमा – boundary |
| 7. महौषधयः – great medicines | 8. परिवृतः – Surrounded by |
| 9. हिमः – snow | 10. सौन्दर्यम् – beauty |
| 11. न्यूनम् – less | 12. कलङ्कः – flow |
| 13. इन्दुः – moon | 14. उन्नतशिखरः – highest peak |
| 15. वासस्थलानि – living place | 16. निदाघकालः – Summer season |

17. वृष्टिः – rain

18. जीवनद्यः – perennial river

19. गुहाः – caves

20. वनेचराः – hunters

21. प्रभाः – lustres

22. विश्वगुरुः – father of entire world

## II. अधो लिखितानां प्रश्नानाम् उत्तरं दीयताम्-

1. हिमालयः कुत्र अस्ति ?
2. हिमालयः कीदृशः पर्वतः ?
3. हिमालयः कीदृश इव स्थितः ?
4. हिमालयः केन सर्वान् पर्वतान् अतिशेते ?
5. हिमालयस्य अपरं नाम किम् ?
6. "निमज्जतीन्दोः किरणेष्विवाङ्कः" – वर्णयत।
7. हिमालयात् प्रवहन्त्यः नद्यः जीवनद्यः इति कथं व्यवह्रियन्ते ?
8. वनेचराणां गृहेषु रात्रौ दीपाः किमर्थं न आवश्यकाः ?
9. हिमालयः इति नाम कथम् अन्वर्थम् अभवत् ?
10. विश्वगुरुः कः ?

## III. सविस्तरम् उत्तरं लिखत -

1. हिमालयस्य महत्वं पाठानुसारं लिखत।
2. हिमालयस्य विश्वगुरोः गुरुत्वं कथं सम्पन्नम् इति विवृणुत।

## IV. मञ्जूषातः उचितं पदं चित्वा पूरयत-

नगाधिराजः, मानदण्डः, सीमां, महौषधयः, हिमेन

1. हिमालयः भारतस्य _________आपादयति।
2. भारतस्य उत्तरस्यां दिशि हिमालयो नाम ________ अस्ति ।



Unit 8.indd 55 06-06-2018 12:42:28

3. अयं गिरिः ________आवृतं भवति ।

4. हिमालयात् ______ प्राप्नुमः ।

5. अयं गिरिः पृथिव्याः ________ इव भवति ।

## V. अधो लिखितेषु समानार्थकपदं चित्वा लिखत-

1. पर्वतः _________ (गिरिः / भूमिः)

2. तोयम् _________ (जलं / क्षीरम्)

3. हिमम् ________ (तुषारः / अग्निः)

4. कलङ्कः ________ (दोषः / गुणः)

5. निदाघकालः _______ (ग्रीष्मः / वसन्तः)

## VI. उचितपदैः योजयत-

| | | |
|---|---|---|
| 1.पृथिवी | - | कुमारसंभवम् |
| 2. कालिदासः | - | गङ्गा |
| 3. शिवः | - | देवतात्मा |
| 4. जीवनदी | - | जगत्पिता |
| 5. हिमालयः | - | भूमिः |

## VII. कथयन्तु 'आम्' अथवा 'न' इति-

1. हिमालयः पूर्वस्यां दिशि वर्तते । ___________

2. हिमेन आवृतत्वात् हिमालयः इति नाम । ___________

3. हिमालये औषधिपदार्थाः न विद्यन्ते । ___________

4. अत्र गङ्गादि जीवनद्यः न प्रवहन्ति । ___________

5. हिमालयः विश्वगुरोः गुरुः इति व्यवह्रियते । ___________



Unit 8.indd 56 06-06-2018 12:42:28

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

### पञ्च महाकाव्यानि-

| काव्यानि | रचयिता |
| --- | --- |
| रघुवंशम् | महाकविः कालिदासः |
| कुमारसंभवम् | महाकविः कालिदासः |
| किरातार्जुनीयम् | महाकविः भारविः |
| शिशुपालवधम् | महाकविः माघः |
| नैषधीयचरितम् | महाकविः श्रीहर्षः |

### कालिदासेन विरचितानि काव्यानि तेषां कथांशः च -

| | | |
| --- | --- | --- |
| रघुवंशम् | - | सूर्यवंशस्य राज्ञां प्रभावः वर्णितः। |
| कुमारसम्भवम् | - | कुमारस्य (सुब्रह्मण्यस्य) जननम् उपवर्णितम्। |
| मेघसन्देशम् | - | नायिकानायकयोः मेघद्वारा कृतः सन्देशोऽभिवर्णितः। |
| ऋतुसंहारम् | - | षण्णां ऋतूणां वर्णनं कृतम्। |
| अभिज्ञानशाकुन्तलम् | - | शकुन्तला-दुष्यन्तयोः कथा उपवर्णिता। |
| मालविकाग्निमित्रम् | - | मालविका-अग्निमित्रयोः प्रेमकथा वर्णिता। |
| विक्रमोर्वशीयम् | - | विक्रम-ऊर्वश्योः कथा अभिवर्णिता। |

### Weblinks :

1. https://sa.in.wikipedia.org/wiki/हिमालयः
2. https://sa.in.wikipedia.org/wiki/कालिदासः

## व्याकरण–अभ्यासः - 4

### धातुः - परस्मैपदी - लृट् – (Future Tense)

#### वद् – to speak

| पुरुषः (Person) | एकवचनम् (Singular) | द्विवचनम् (Dual) | बहुवचनम् (Plural) |
|---|---|---|---|
| प्रथमपुरुषः (I Person) | वदिष्यति | वदिष्यतः | वदिष्यन्ति |
| मध्यमपुरुषः (II Person) | वदिष्यसि | वदिष्यथः | वदिष्यथ |
| उत्तमपुरुषः (III Person) | वदिष्यामि | वदिष्यावः | वदिष्यामः |

#### भव् – to be

| पुरुषः (Person) | एकवचनम् (Singular) | द्विवचनम् (Dual) | बहुवचनम् (Plural) |
|---|---|---|---|
| प्रथमपुरुषः (I Person) | भविष्यति | भविष्यतः | भविष्यन्ति |
| मध्यमपुरुषः (II Person) | भविष्यसि | भविष्यथः | भविष्यथ |
| उत्तमपुरुषः (III Person) | भविष्यामि | भविष्यावः | भविष्यामः |

#### पठ् – to read

| पुरुषः (Person) | एकवचनम् (Singular) | द्विवचनम् (Dual) | बहुवचनम् (Plural) |
|---|---|---|---|
| प्रथमपुरुषः (I Person) | पठिष्यति | पठिष्यतः | पठिष्यन्ति |
| मध्यमपुरुषः (II Person) | पठिष्यसि | पठिष्यथः | पठिष्यथ |
| उत्तमपुरुषः (III Person) | पठिष्यामि | पठिष्यावः | पठिष्यामः |




Unit 8.indd 58 06-06-2018 12:42:28

# अनुच्छेदलेखनम् – 4

## (Comprehension – 4)

धेनुः अस्माकं जननी इव । सा दुग्धं यच्छति । यदा मेघाः वारीणि वर्षन्ति तदा हरितानि तृणानि उद्भवन्ति । धेनवः सन्तुष्टाः च भवन्ति । धेनोः दुग्धं पौष्टिकं भवति । बालानां मतयः धेनोः दुग्धपानेन तीक्ष्णाः भवन्ति । जीवनस्य सफलतायै तीक्ष्णा मतिः आवश्यकी भवति। अतः वयं सर्वे धेनुं पालयामः आदरामश्च ।



प्रश्नाः-

1. धेनुः किं यच्छति?
2. बालानां मतयः कथं तीक्ष्णाः भवन्ति?
3. धेनोः दुग्धं कथं भवति?
4. जीवनस्य सफलतायै का आवश्यकी?
5. अस्य गद्यांशस्य समुचितं शीर्षकं दीयताम्।

# अनुवादः – 4

## (Translation - 4)

कोऽपि मेषपालः स्वतनयं मेषैः सह प्रतिदिनं वनं प्रेषयामास। एकदा, काननं गतः सः दुष्टः बालः विनोदार्थं "व्याघ्रः, व्याघ्रः" इति उच्चैः आक्रोशत्। सपदि समीपस्थाः जनाः शस्त्राणि आदाय तत्समीपम् अधावन्। परन्तु तत्र कोऽपि व्याघ्रः न दृष्टः। बालकोऽपि वञ्चितान् तान् वीक्ष्य, पुनः पुनः अहसत्। तेऽपि बालस्य असत्यवाचा क्रुद्धाः यथागतं गताः। अथ अन्येद्युः सत्यमेव कश्चित् व्याघ्रः समायातः। तं दृष्ट्वा भीतः बालकः "व्याघ्रः, व्याघ्रः" इति दीनम् आक्रोशत्। 'अयं बालः पुनरपि मृषा आक्रोशति' इति मत्वा न कोऽपि बालकं रक्षितुम् आगतः। तेन, अरक्षितः बालकः व्याघ्रेण हतः। अतः, विनोदार्थमपि असत्यं न वक्तव्यम्।।



Unit 8.indd 59 06-06-2018 12:42:28